श्वासकासामहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत् ॥
प्रमेहमूढगर्भामगण्डामयविषापहम्"।
इति भावप्रकाशः ॥ अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। शीतलत्वम्। रेचनत्वम्। गुल्मपित्तोदरश्लेष्मक्रिमिकुष्ठज्वरापहत्वञ्च॥ इति राजनिर्घण्टः ॥

इन्द्रवृद्धा, स्त्री, (इन्द्रेण इन्द्रियजनितदोषेण वृद्धा। यद्वा इन्द्रः श्रेष्ठोऽपि वृद्धः क्षणो भवति यस्याः।) व्रणरोगविशेषः। तस्य लक्षणम्।
"पद्मकर्णिकवन्मध्ये पिड़काभिः समाचिताम्।
इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक्" ॥
इति निदानम् ॥ तस्याश्चिकित्सा।
विवृत्तामिन्द्रवृद्धाञ्च गर्द्दभीं जालगर्द्दभम्।
पैत्तिकस्य विसर्पस्य क्रियया साधयेत् भिषक्।
पाके तु शोधयेदाज्यपक्वैर्मधुरभेषजैः" ॥
इति भावप्रकाशः ॥
("या पद्मकर्णिकाकारा पिटिका पिटिकान्विता।
साविद्धा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी" ॥)

इन्द्रवृक्षः, पुं, (इन्द्रस्य वृक्षः।) देवदारु। इति जटाधरः ॥ (देवदारुशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

इन्द्रसावर्णिः, पुं, चतुर्द्दशमनुः। अस्मिन् मन्वन्तरे वृहद्भानुरवतारः। शुचिरिन्द्रः। पवित्रचाक्षुषादयो देवाः। अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। उरुगम्भीरब्रध्नाद्या मनुपुत्त्रा भविष्यन्ति ॥ इति श्रीभागवतम् ॥ (अयं हि भौत्यनाम्ना व्याख्यातः। यथा, विष्णुपुराणे ३। २।
"भौत्यश्चतुर्दशश्चात्र मैत्रेय भविता मनुः।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च शृणुष्व तान्। ४०।
चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिरस्तथा।
वचोवृद्धाश्च वै देवाः सप्तर्षीनपि मे शृणु। ४१।
अग्निबाहुः शुचिः शुक्रो मागधोऽग्नीध्र एव च।
युक्तस्तथाजितश्चान्यो मनुपुत्त्रानतः शृणु। ४२।
उरुगम्भीरब्रध्नाद्या मनोस्तस्य सुता नृपाः"।४३।
मार्कण्डेयपुराणेऽपि १०० अध्याये उक्तरूपेण वर्णितम्। अधुना तु सप्तममन्वन्तरस्याष्टाविंशतितमं युगं।)

इन्द्रसुतः, पुं, (इन्द्रस्य सुतः।) बालिनामवानरराजः। इति हेमचन्द्रः॥ अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥ जयन्तः। अर्ज्जुनः॥

इन्द्रसुरसः, पुं, (इन्द्रः इन्द्रवृक्ष इव सुरसः सुपथ्यरसः।) सिन्दुवारवृक्षः। इत्यमरः॥ निसिन्दा इति ख्यातः। (सिन्दुवारशब्दे निर्गुण्डीशब्दे च अस्य गुणादयो ज्ञेयाः ॥)

इन्द्रसुरिसः, पुं, वृक्षविशेषः। निसिन्दा इति भाषा। तत्पर्य्यायः। इन्द्राणी २ निर्गुण्डी ३ सुरसा ४। इति रत्नमाला॥ इन्द्रसुरसः ५ सिन्दुवारः ६ इन्द्राणिका ७। इत्यमरः॥ विसन्धकः ८ सिन्धकं ९ सुरसः १० सिन्धुवारितः ११ इन्द्रालिका १२ सिन्धुवारकः १३। इति शब्दरत्नावली॥ (इन्द्राणीशब्देऽस्य विशेषो ज्ञेयः।)

इन्द्रा, स्त्री, (इदि+रन्।) फणिज्झकवृक्षः। इति मेदिनी॥ फाँटा जामीर इति भाषा। इन्द्रपत्नी। शची। इति शब्दरत्नावली।

इन्द्राग्निधूमः, पुं, (इन्द्राग्नेर्मेघवह्नेर्धूम इव।) हिमं। इति हारावली॥

इन्द्राणिका, स्त्री, (इन्द्राणी+कन्।) इन्द्रसुरिसवृक्षः। इत्यमरः॥

इन्द्राणी, स्त्री, (इन्द्रस्य ऐश्वर्य्यशालिनः सुरराजस्य वा पत्नी। इन्द्र+इन्द्रवरुणेति ङीष् आनुक् च।) दुर्गा। यथा,—
"ऐश्वर्य्यं परमं यस्या वशे चैव सुरासुराः।
इदि परमैश्वर्य्ये च इन्द्राणी तेन सा शिवा"॥
इति देवीपुराणे ४५ अध्यायः॥ *॥ इन्द्रभार्य्या। तत्पर्य्यायः। पुलोमजा २ शची ३। इत्यमरः॥ पौलोमी ४। इति मेदिनी॥ पूतक्रतायी ५। इति जटाधरः॥ माहेन्द्री ६ जयवाहिनी ७ ऐन्द्री ८ शतावरी ९। इति शब्दरत्नावली॥
("यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा"।
इति भविष्यपुराणे षट्पञ्चमीव्रतकथायाम्। इन्द्रशक्तिः। यथा ऋग्वेदे १।२२।१२। "इहेन्द्राणीमुपह्वये वरुणानीं"। "इन्द्राणीं इन्द्रस्य सूर्य्यस्य वायोर्वा शक्तिम्"। इति दयानन्दसरस्वतीकृतभाष्यम्।) इन्द्रसुरिसवृक्षः। स्त्रीणां करणं। इति मेदिनी॥ नीलसिन्दुवारवृक्षः। स्थूलैला। सूक्ष्मैला। इति राजनिर्घण्टः॥ अष्टमातृकान्तर्गतमातृकाविशेषः॥ इति स्मृतिः॥

इन्द्रानुजः, पुं, (अनु पश्चात् जायते इति अनुजः कनिष्ठः। इन्द्रस्यानुजः। विष्णुः खलु कश्यपात् अदितौ वामनरूपेण इन्द्रस्य पश्चात् जातः।) विष्णुः। इति हेमचन्द्रः॥ (विवृतिर्वामनशब्दे द्रष्टव्या।)

इन्द्रायुधं, स्त्री, (इन्द्रस्यायुधमिव चापाकृतित्वात्।) इन्द्रधनुः। इत्यमरः॥ रामधनुक गण्डी इत्यादि भाषा।
("स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम्"।
इति रघुवंशे।१२।७९। तथा, मनुः। ४।५९।
"न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः"।)

इन्द्रारिः, पुं, (इन्द्रस्य अरिः शत्रुः।) असुरः। इत्यमरः॥

इन्द्रावरजः, पुं, (इन्द्रस्य अवरजः वामनरूपेण अनुजः।) विष्णुः। इत्यमरः॥

इन्द्राशनः, पुं, (इन्द्रस्य अशनः खाद्यद्रव्यम्।) संविदावृक्षः। इति शब्दमाला॥ सिद्धि इति भाषा। गुञ्जा। इति हारावली॥ कुच इति भाषा।
("इन्द्राणिकेन्द्राशनकञ्च"।
"तथाचेन्द्राशनोत्कटैः"।
"ग्रीष्मसुन्दरमण्डूकी जयन्तीन्द्राशनस्य च"॥
इति वैद्यकरसेन्द्रसारसंग्रहः॥)

इन्द्रियं, स्त्री, (इन्द्रस्यात्मनो लिङ्गमनुमापकम्। इन्द्रेण ईश्वरेण सृष्टं। इन्द्रेणात्मना मम चक्षुर्मम श्रोत्रमित्यादि क्रमेण ज्ञातं। इन्द्रेण जुष्टं वा इत्याद्यर्थेषु इन्द्रशब्दात् निपातनात् घच्।) ज्ञानकर्म्मसाधनम्। तत्पर्य्यायः। हृषीकम् २ विषयि ३। इत्यमरः॥ अक्षम् ४ करणम् ५ ग्रहणम् ६। इति राजनिर्घण्टः॥ तत्र तु ज्ञानेन्द्रियाणि पञ्च। यथा। कर्णः १ त्वक् २ चक्षुः ३ जिह्वा ४ नासिका ५ कर्म्मेन्द्रियाणि पञ्च यथा। वाक् १ पाणिः २ पादः ३ पायुः ४ उपस्थः ५। अन्तरिन्द्रियाणि चत्वारि। मनः १ बुद्धिः २ अहङ्कारः ३ चित्तं ४॥ मनस्तावदिन्द्रियाणां नियामकम्। चतुर्द्दश देवाः चतुर्द्दशेन्द्रियनियन्तारः। तत्र श्रोत्रस्य देवता दिक्। त्वचो वातः। चक्षुषः सूर्य्यः। रसनायाः प्रचेताः घ्राणस्याश्विनौ। वाचो वह्निः। हस्तस्य इन्द्रः। पादस्य विष्णुः। पायोर्मित्रः। उपस्थस्य प्रजापतिः। मनसश्चन्द्रः। बुद्धेश्चतुर्मुखः। अहङ्कारस्य शङ्करः। चित्तस्याच्युतः। इति वेदान्तः॥ न्यायमते। पृथिव्या इन्द्रियं घ्राणं। जलस्य जिह्वा। तेजसश्चक्षुः। वायोस्त्वक्। आकाशस्य कर्णः। (अथ बुद्धेर्ब्रह्मा। अहङ्कारस्येश्वरः। मनसश्चन्द्रमाः। दिशः श्रोत्रस्य। त्वचो वायुः। सूर्य्यश्चक्षुषोः। रसनस्यापः। पृथिवी घ्राणस्य। वचसोऽग्निः। हस्तयोरिन्द्रः। पादयोर्विष्णुः। पायोर्मित्रं। प्रजापतिरुपस्थस्येति। इति सुश्रुतः॥) (यथा, मनुः। २। ८८। "इन्द्रियाणां विचरतां विषयेष्वपहारिषु"।
विज्ञानम्। यथा, ऋग्वेदे १।१११।२।
"यथा क्षयाम सर्व्ववीरया विशातन्तः शर्द्धाय धासथास्विन्द्रियम्"। "इन्द्रियं विज्ञानम्" इति दयानन्दभाष्यम्।) शुक्रम्। वीर्य्यम्। इत्यमरः॥

इन्द्रियस्वापः, पुं, (इन्द्रियस्य स्वापः सम्यक् निरोधः।) प्रलयः। इति राजनिर्घण्टः॥

इन्द्रियायतनं, स्त्री, (इन्द्रियाणां आयतनमाश्रयस्थानम्।) शरीरम्। इति हेमचन्द्रः॥

इन्द्रियार्थः, पुं, (इन्द्रियाणामर्थः।) इन्द्रियजन्यज्ञानविषयः। यथा। रूपं। शब्दः। गन्धः। रसः। स्पर्शः। तत्पर्य्यायः। विषयः २ गोचरः ३। इत्यमरः॥ (यथा, मनुः। ४। १६।
"इन्द्रियार्थेषु सर्व्वेषु न प्रसज्जेत कामतः"।
"अपि स्वदेहात् किमुतेन्द्रियार्थात्
यशोधनानां हि यशो गरीयः"।
इति रघुः।१४।३५।)

इन्द्रेज्यः, पुं, (इन्द्रस्य इज्यः।) वृहस्पतिः। इति शब्दरत्नावली॥

इन्ध ई ध ङ ञि दीप्तौ। इति कविकल्पद्रुमः॥ (रुधां-आत्मं-अकं-सेट्।) ङ्खादिः। ई ञि इन्धोऽस्ति। ङ ध इन्धे। इति दुर्गादासः॥

इन्धनं, स्त्री, (इन्धे दीप्यतेऽग्निरनेन। इन्ध+करणे+ल्युट्।) अग्निसन्दीपनतृणकाष्ठादि। जालानी काठ इति भाषा। तत्पर्य्यायः। इध्मम् २ एधः ३ समित् ४ एधम् ५। इत्यमरः॥ समिन्धनम् ६। इति शब्दरत्नावली॥ (यथा, मनुः। ७। ११८।
"अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्"।)

इन्वकाः, स्त्री, इल्वलाः। मृगशिरोनक्षत्रोपरिस्थितपञ्चताराः। इत्यमरटीकायां स्वामी॥

इभः, पुं, स्त्री, (एति गच्छतीति। इण भन्। औणादिकोऽयं प्रत्ययः।) हस्ती।
("खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा"।
इति मनुः। ११।६८। यथा, उत्तरचरिते।